# ३ देहल्याः शासकाः

वयं द्वितीये अध्याये दृष्टवन्तः यत् कावेरीनदीमुखपुलिनसदृशानि क्षेत्राणि महतां राज्यानां केन्द्राणि जातानि आसन् । किं भवन्तः अनुभूतवन्तः यत् द्वितीये अध्याये एतादृशस्य कस्यचित् राज्यस्य उल्लेखः नास्ति यस्य राजधानी देहली स्यात् ? एतस्य कारणम् इदम् अस्ति यत् द्वादशशताब्द्याम् एव देहलीनगरं केनचित् महत्त्वपूर्णनगररूपेण अस्तित्वम् उपगतम् ।

प्रथमायां तालिकायां दृष्टिपातं कुर्वन्तु । आदौ तोमरराजपुत्राणां काले देहली कस्य साम्राज्यस्य राजधानी अभवत् । द्वादशशताब्द्याः मध्ये तोमराः अजमेरस्य चौहानजनैः पराजिताः । तोमराणाम् अथ च चौहानजनानां काले एव देहली वाणिज्यस्य एकं महत्वपूर्णं केन्द्रम् अभवत् । एतस्मिन् नगरे बहवः समृद्धशालिनः वणिजः निवसन्ति स्म । ये अनेकेषां मन्दिराणां निर्माणं कारितवन्तः । अत्र देहलीवालाख्याः नाणकाः अपि निर्मीयन्ते स्म ये अत्यधिकाः प्रचलिताः आसन् ।

*मानचित्रम् १*

*त्रयोदश-चतुर्दश-शताब्द्योः देहलीशासनस्य कानिचन चितानि नगराणि ।*




त्रयोदशशताब्द्याः आरम्भे देहलीशासनस्य स्थापना अभवत् अथ च तेन सार्धम् एव देहली एकस्याम् एतादृश्यां राजधान्यां परिवर्तिता यस्याः नियन्त्रणम् एतस्य उपमहाद्वीपस्य बृहति क्षेत्रे विस्तृतम् आसीत् । पुनः एकवारं प्रथमां तालिकां पश्यन्तु च तेषां पञ्चवंशानां परिचयं प्राप्नुवन्तु येषां मेलने देहली किमपि प्रमुखं शासनकेन्द्रम् अभूत् । यत् क्षेत्रं वयम् अद्य देहल्याः नाम्ना जानीमः तत्र एते शासकाः अनेकानि नगराणि स्थापितवन्तः । प्रथमं मानचित्रं दृष्ट्वा देहली-ए-कुह्ना, सीरी एवञ्च जहाँपनाह इत्येतानि परिचिन्वन्तु ।

### तालिका – १

## देहल्याः शासकाः

| | |
|---|---|
| **राजपूतवंशः** | |
| तोमरः | आरम्भिक-द्वादश-शताब्दी – ११६५ |
| अनङ्गपालः | ११३० -११४५ |
| चौहानः | ११६५ – ११९२ |
| पृथ्वीराज-चौहानः | ११७५ - ११९२ |
| **प्रारम्भिक-तुर्की-शासकः** | **१२०६ - १२९०** |
| कुत्बउद्दीन-ऐबकः | १२०६ -१२१० |
| शमसुद्दीन-इल्तुतमिशः | १२१०- १२३६ |
| रजिया | १२३६ - १२४० |
| गयासुद्दीन-बलबनः | १२६६ - १२०० |



***इल्तुतमिश इत्यस्य स्मारकः***



***अलाई-द्वारम्***

| | |
|---|---|
| **खलजी-वंशः** | **१२९० -१३२०** |
| जलालुद्दीन-खलजी | १२९० -१२९६ |
| अलाउद्दीन-खलजी | १२९० -१३१६ |
| **तुगलक-वंशः** | **१३२० - १४१४** |
| गयासुद्दीन –तुगलकः | १३२० - १३२४ |
| मुहम्मद-तुगलकः | १३२४ - १३५१ |
| फिरोज-शाह-तुगलकः | १३५१ - १३८८ |
| **सैयद-वंशः** | **१४१४** |
| खिज-खानः | १४१४ - १४२१ |
| **लोदी-वंशः** | **१४५१ - १५२६** |
| बहलोल-लोदी | १४५१-१४८९ |



***फिरोजशाह-तुगलकस्य स्मारकः***

***देहल्याः शासकानां विषये सूचनाः – कथम् ?***

यद्यपि अभिलेखानां  नाणकानां स्थापत्यानां च माध्यमेन पर्याप्ता सूचना उपलभ्यते, परन्तु इतोऽपि महत्त्वपूर्णाः ते इतिहासाः दिनाङ्काः "तारीख" (एकवचनं), "तवारीख"(बहुवचनम्) च सन्ति ये एतेषां यवनशासकानां शासनकाले प्रशासनस्य फारसीभाषायां लिखिताः आसन्।



चित्रम् – १

पाण्डुलिपीः सज्जीकर्तुं चत्वारः चरणाः सन्ति।

१ कर्गदस्य सज्जीकरणम्।

२ लेखनकार्यम्।

३ महत्त्वपूर्ण-शब्दानाम् अनुच्छेदानां च ध्यानाकर्षणाय सुर्वणं सुर्वणं द्रवीकृत्य तस्य प्रयोगः।

४ पुस्तकावरणस्य सज्जीकरणम्।

तवारीखस्य लेखकाः मन्त्रिणः प्रशासकाः कवयः राजसभासत्सदृशाः सुशिक्षिताः जनाः भवन्ति स्म ये घटनानां वर्णनम् अपि कुर्वन्ति स्म अथ च शासकेभ्यः प्रशासन-सम्बद्धं परामर्शम् अपि यच्छन्ति स्म। ते न्यायोचितस्य शासनस्य महत्त्वे विश्वसन्ति।

? किं भवन्तः अनुभवन्ति यत् न्याय-चक्रं राज्ञः प्रजायाः च मध्ये विद्यमानं सम्बन्धं ज्ञापयितुम् उपयुक्तः शब्दः अस्ति ?

## न्याय-चक्रम्

त्रयोदश-शताब्द्याः इतिहासकारः फख-ए-मुदब्बिरः लिखितवान् आसीत्।

नृपस्य कार्यं सैनिकैः विना न चलितुं शक्नोति । सैनिकाः वेतनेन विना न जीवितुं शक्नुवन्ति । वेतनं कृषकेभ्यः एकत्रितेन राजस्वेन आगच्छति । परन्तु कृषकाः अपि राजस्वं तदा एव दातुं शक्ष्यन्ति यदा ते समृद्धाः प्रसन्नाः च भवेयुः । इत्थं तदा एव सम्भवितुं शक्नोति यदा नृपः न्यायसङ्गतं निष्कपटिकं च प्रशासनं कुर्यात्।

एतान् काञ्चन विषयान् मनसि धारयन्तु (१) तवारीखस्य लेखकाः नगरेषु विशेषतया देहल्यां निवसन्ति स्म ग्रामे तु प्रायः कदाचित् एव निवसेयुः । (२) ते प्रायः शासकानां कृते स्वकीयान् इतिहासान् लिखन्ति स्म येन तेभ्यः प्रभूतं धनं प्राप्नुयुः । (३) प्रायः एते लेखकाः स्वशासकान् जन्मसिद्धाधिकाराश्रितायाः एवञ्च लिङ्गभेदाश्रितायाः आदर्शसमाजव्यवस्थायाः निर्माणार्थं परामृशन्ति स्म । तेषां विचारैः सर्वे जनाः सहमताः न भवन्ति स्म ।

१२३६ तमे ख्रिस्ताब्दे इल्तुमिशशासकस्य पुत्री रजिया सिंहासनारूढा जाता । तस्य युगस्य इतिहासकारेण मिन्हाज-ए-सिराज-महोदयेन अङ्गीकृतम् अस्ति यत् सा स्वकीयेषु सर्वेषु भ्रातृषु योग्यतमा अधिकसक्षमा च आसीत्, परन्तु पुनरपि सः तां सम्राज्ञीं शासकरूपेण स्वीकर्तुं सङ्कोचम् अनुभवति स्म । राजसभासदः अपि तस्याः स्वतन्त्ररूपेण शासकत्वस्य प्रयासैः सन्तुष्टाः न आसन् । सा १२४० तमे ख्रिस्ताब्दे सिंहासनात् अपसारिता ।।

### रजिया-महोदयायाः विषये मिन्हाज-ए-सिराजस्य विचाराः

मिन्हाज-ए-सिराजस्य चिन्तनम् आसीत् यत् ईश्वरेण या आदर्शसमाजव्यवस्था रचिता अस्ति तस्याः अनुसारं स्त्रियः पुरूषाधीनाः भवेयुः राज्ञ्याः शासनं तस्याः व्यवस्थायाः विपरीतम् आसीत् । अतः सः पृच्छति “खुदा इत्यस्य रचनायाः विवरणकोशे तस्य विवरणं यतोहि पुरुषाणां सूच्यां न आगच्छति, अतः एतैः विशिष्टैः गुणैः अपि सा अन्ततः किं प्राप्तवती ?”

रजिया स्वस्य अभिलेखेषु मुद्रासु च उटङ्कितवती यत् सा इल्तुतमिशशासकस्य पुत्री आसीत् । कस्मिँश्चित् आधुनिकस्य आन्ध्रप्रदेशस्य वारङ्गलक्षेत्रे काले काकतीयवंशस्य राज्यम् आसीत् । तस्य वंशस्य राज्ञी रुद्रम्मादेव्याः (१२६२ – १२८९) व्यवहारात् रजियायाः व्यवहारः सर्वथा भिन्नः आसीत् । रुद्रम्मादेवी स्वस्य अभिलेखेषु स्वस्य नाम पुरुषवत् लेखयित्वा स्वस्य विषये पुरुषत्वस्य भ्रमम् उत्पादितवती आसीत् । काचित् एका अपरा महिलाशासिका काश्मीरस्य रानी-दिद्दा (९८० - १००३) इति आसीत् । तस्याः नाम “दीदी” (ज्येष्ठभगिनी) इत्यस्य एव विकृतं रूपम् अस्ति । स्पष्टम् एव अस्ति प्रजया स्वस्याः प्रियराज्ञ्याः कृते इदं स्नेहयुक्तं सम्बोधनं कृतं स्यात् ।

? मिन्हाजस्य विचारान् स्वशब्देषु व्यक्तीकुर्वन्तु । किं भवन्तः अनुभवन्ति यत् रजियायाः विचाराः अपि एते एव आसन् ? भवताम् अनुसारं स्त्रीणां कृते शासकः इति पदस्य अलङ्करणम् एतावत् कठिनं किमर्थम् आसीत् ?

**जन्मसिद्धाधिकारः**

जन्मनः आधारेण विशेषाधिकारस्य स्वत्वप्रतिपादनम् । उदाहरणार्थं जनाः मन्यन्ते स्म यत् कुलीनाः शासनस्य अधिकारं न्यासरूपेण प्राप्नुवन्ति यतो हि ते केषुचित् विशिष्ट-कुटुम्बेषु उत्पन्नाः सन्ति ।

**लिङ्गभेदः**

स्त्रीपुरुषयोः मध्ये सामाजिकं तथा च शरीररचनासम्बद्धम् अन्तरम् । सामान्यतः एषः तर्कः दीयते यत् एतादृशस्य अन्तरस्य कारणात् पुरुषाः स्त्रीषु श्रेष्ठतराः भवन्ति ।

## देहलीशासनस्य विस्तारः – गैरिसननगरात् साम्राज्यं यावत्




**मानचित्रम् – २**
शमसुद्दीन-इल्तुतमिश-द्वारा विजितानि प्रमुखाणि नगराणि

त्रयोदशशताब्द्याः आरम्भिकेषु वर्षेषु देहल्याः शासकानां शासनं गैरिसन इत्येतेषाम् अर्थात् रक्षकसैनिकानां समूहाः निवासार्थं निर्मितपिहितदुर्ग-नगरैः प्रायः कदाचित् एव प्रथितं स्यात्। ते नगरैः सह सम्बद्धाः आसन् परन्तु ततः दूरम् अन्तःप्रदेशेषु तेषां नियन्त्रणम् अल्पतरम् आसीत् अतः ते अन्नाद्यवश्यकसामग्र्याः कृते व्यापारे करे तथा च द्रव्यादिलुँठने एव निर्भराः आसन् ।

देहल्याः सुदूरं बङ्गालस्य सिन्धस्य च गैरिसननगराणां नियन्त्रणम् अतीव कठिनम् आसीत्। राजद्रोह-युद्ध-दुष्प्राकृति कस्थितेः कारणेन अपि तेषां सम्पर्कस्य अदृढतन्तवः छिन्नाः भिन्नाः च जायन्ते स्म । आगम्यमानैः आक्रमणकारिभिः अथ च तत्रत्यैः सेनानायकैः आह्वाहनानि लभ्यन्ते स्म, ये सेनानायकाः अल्पतराम् अपि न्यूनताम् अनुभूय विद्रोहस्य ध्वजाम् उद्वेलयन्ति स्म । देहलीसाम्राज्यम् एतादृशैः आह्वानैः कथञ्चित् आत्मसंरक्षितम् आसीत्। एतस्य राज्यस्य गयासुद्दीनबलबनस्य काले संस्थापनम् एवञ्च अलाउद्दीनखलनी तथा च मुहम्मदतुगलकस्य काले च विस्तारः जातः।

यानि अभियानानि राज्यस्य अन्तःसीमासु जातानि तेषां लक्ष्यं गैरिसननगराणां पृष्ठभूमिषु स्थितानाम् अन्तःक्षेत्राणां स्थितेः सुदृढीकरणम्आसी । एतेः अभियानैः काले गङ्गायाः यमुनायाः च दोआब (नदीद्वयमध्यवर्तिक्षेत्रात्) इत्यस्मात् वनानि स्वच्छीकृतानि अथ च आखेट-सङ्ग्राहकाः पशुपालकाः च तेषां पर्यावासेभ्यः निष्कासिताः।

*अन्तःप्रदेशाः*

*कस्यचित् नगरस्य अथवा पोताशयपुरस्य पार्श्वस्थानि क्षेत्राणि यानि तस्य क्षेत्रस्य कृते वस्तूनां अन्यासां च सेवानाम् आपूर्तिं कुर्युः ।*

**गैरिसन-नगरम्**

दुर्गबद्ध-निवासः यत्र सैनिकाः निवसन्ति।

सा भूमिः कृषकेभ्यः प्रदत्ता कृषिकार्यं प्रोत्साहितम् । व्यापार-मार्गाणां सुरक्षायाः क्षेत्रीयस्य व्यापारस्य च उन्नतेः कृते नूतनानां दुर्गाणां नगराणां च निर्माणं कृतम् ।

अपरः विस्तारः साम्राज्यस्य बाह्यसीमासु अभवत् । अलाउद्दीन-खलजी-महोदयस्य शासनकाले दक्षिणभारतं लक्षीकृत्य सैनिकानाम् अभियानानि प्रारब्धानि, (तृतीये मानचित्रे पश्यन्तु) अथ च एतानि अभियानानि मुहम्मदतुगलकस्य समये स्वोत्कर्षे आसन् । एतैः अभियानैः साम्राज्यस्य सेनाद्वारा हस्तिनः अश्वाः सेवकाः मूल्यवन्तः धातवः च स्वायत्तीकृतानि आसन् ।

देहलीसाम्राज्यस्य सेनानां प्रारम्भः अपेक्षाकृत् अल्पप्रभावी आसीत्, परन्तु १५० वर्षाणाम् पश्चात् मुहम्मदतुगलकस्य शासनकालस्य अन्तपर्यन्तम् एतस्य उपमहाद्वीपस्य किमपि बृहत्क्षेत्रम् एतस्याः युद्ध-अभियानस्य अन्तर्गतम् आगतम् आसीत् । सः शत्रुसेनाः पराजितवान् नगरेषु च आधिपत्यं कृतवान् । एतस्य सेनानायकाः क्षेत्राधिकारिणः च प्रशासकाभियोगेषु निर्णयान् श्रावयन्ति स्म युगपदेव एव कृषकेभ्यः करादानम् अपि कुर्वन्ति स्म । परन्तु एतावति विशाले क्षेत्रे एतेषां नियन्त्रणं कां सीमां यावत् कियत्प्रभावी च आसीत् ?




## तृतीये मानचित्रे

अलाउद्दीन-खलजी-महोदयस्य दक्षिणभारतस्य अभियानम्

**चित्रम् – २**

*द्वादश-शताब्द्याः अन्तिमे दशके निर्मित-कुव्वत-अल-इस्लाम-यवनमन्दिरम् तथा च तस्य सूच्यग्रस्तम्भाः । इदं जामाख्यं यवनमन्दिरं देहल्याः शासकैः सर्वादौ निर्मिते नगरे स्थितम् अस्ति । इतिहासे एतन्नगरं देहली-ए-कुहना अर्थात् पुरातनं नगरम् इति उक्तम् अस्ति । एतस्य यवनमन्दिरस्य विस्तारम् इल्तुतमिशः अलाउद्दीन-खलजी च इत्येतौ कृतवन्तौ । त्रयः सूच्यग्रस्तम्भाः कुत्बौद्दीन-ऐबक-इल्तुतमिश-फिरोजशाहतुगलक इत्येतैः त्रिभिः शासकैः निर्मापिताः आसन् ।*





चित्रम् – ३

बेगमपुरी-मसजिद । इयं मुहम्मद-तुगलकस्य राज्यकाले, देहल्यां तस्य नूतना राजधानी जहांपनाह इत्यस्य (विश्वस्य शरणस्थली) मुख्यमसजिदरूपेण निर्मिता आसीत् । प्रथमे मानचित्रे जहांपनाह इत्येतम् अन्विष्यन्तु ।

## मसजिद (यवन-धार्मिक-स्थलम्)

*अयम् अरबीभाषायाः शब्दः अस्ति,यस्य शाब्दिकः अर्थः अस्ति – एतादृशं स्थानं यत्र मुसलमान-जनाः अल्लाहस्य आराधनायां सजदा (अर्थात् जानुनि ललाटं च भूमौ संस्पृश्य) कुर्वन्ति । जामामसजिद (अथवा मसजिद –ए-जामी), तत् मसजिदं भवति, यत्र अनेके मुसलिमजनाः एकत्रीभूय सार्धं नमाजं पठन्ति । नमाजस्य पम्परार्थं सर्वेषु नमाजकर्तृषु अधिकतमः सम्माननीयः अथ च विद्वान् पुरुषः इमाम अर्थात् नेतृरूपेण चीयते । इमाम-महोदयः शुक्रवासरस्य नमाजप्रसङ्गे धर्मोपदेशं अर्थात् खुतवा इत्यपि ददाति ।*

*नमाजस्य काले मुसलिमजनाः मक्कां प्रति अभिमुखाः भूत्वा तिष्ठन्ति । भारतात् मक्का पश्चिमदिशि भवति । मक्कायाः या दिशा अस्ति सा "किबला" इति उच्यते ।*



देहल्याः शासकाः सम्पूर्णस्य उपमहाद्वीपस्य अनेकेषु नगरेषु मसजिद इत्येतासां निर्माणं कारितवन्तः । वयं मुसलमानाः इस्लामस्य च रक्षकाः इति प्रदर्शितायाः भावनायाः पोषणं भवति स्म । समानस्य आचारसंहितायाः आस्थायाः च पालयितॄणां श्रद्धालूनां परस्परम् एकेन समुदायेन सम्बद्धतायाः बोधकारणे अपि मसजिद (यवनमन्दिराणि) सहायकानि आसन् । मुसलिमजनाः कस्यचित् एकस्य समुदायस्य अङ्गभूताः सन्ति इत्येतस्य बोधस्य प्रबलीकरणम् आवश्यकम् आसीत् यतोहि मुसलमानजनानां पृष्ठभूमयः विभिन्नाः आसन् ।



*चित्रम् - ४*

***मोठस्य मसजिद (यवनमन्दिरम्), सिकन्दरलोदीमहोदयस्य शासनकाले इदं तस्य मन्त्रिणा निर्मापितम् असीत् ।***





*चित्रम् – ५*

***जमाली-कमाली इत्यस्य मसजिद (यवनमन्दिरम्), १५२० इत्यस्य दशकस्य अन्तिमेषु दिनेषु निर्मितम् आसीत् ।***

? द्वितीय-तृतीय-चतुर्थ-पञ्चानां च चित्राणां परस्परं तुलनां कुर्वन्तु । एतेषां यवनमन्दिराणां समानतानाम् असमानतानाम् अन्वेषणस्य प्रयासं कुर्वन्तु । तृतीय-चतुर्थ-पञ्चमेषु च चित्रेषु स्थापत्यस्य तस्याः परम्परायाः विकासः दृश्यते, यस्याः चरमोत्कर्षः अस्माभिः देहल्यां शाहजहान् इत्यस्य यवनमन्दिरे दृश्यते । पञ्चमाध्यायस्थे सप्तमे चित्रे पश्यन्तु ।

## *खलजीवंशस्य तुगलकवंशस्य च अन्तर्गतं प्रशासनं समेकन इति च - नातिदूरात् एकं दृष्टिपातम् ।*

देहलीसदृशस्य विशालसाम्राज्यस्य समेकन इत्यस्य कृते विश्वसनीयानां प्रान्ताधिपतीनां प्रशासकानां च आवश्यकता आसीत् । देहल्याः आरम्भिकाः शासकाः विशेषतया इल्तुतमिशः क्षेत्रपतीनां भूस्वामिनां च स्थाने स्वविशिष्टानां दासानां प्रान्ताधिपतिरूपेण नियोजनम् अधिकं समीचीनतरं मन्यते स्म । एते दासाः फारसीभाषायां बंदगाँ इति उच्यन्ते स्म अथ च एते सैनिकसेवायाः कृते क्रीयन्ते स्म । ते राज्यस्य केषुचित् अतीव महत्त्वपूर्णेषु राजनीतिकपदेषु कार्यं कर्तुं बहुसावधानतया प्रशिक्षिताः क्रियन्ते स्म । यतोहि ते सम्पूर्णतया स्वस्य स्वामिनः उपरि एव निर्भराः भवन्ति स्म, अतः शासकाः अपि तेषु विश्वासं कृत्वा तेषु निर्भराः भवितुं शक्नुवन्ति स्म ।

## पुत्रेभ्यः महनीयाः दासाः

शासकाः परामृश्यन्ते स्म,
यः दासः अस्माभिः पालितः पोषितः अग्रेसरः च कृतः अस्ति, तस्य सम्भालनम् अस्माभिः करणीयम्, यतोहि भाग्यम् अनुकूलं भवेत् तदा एव सम्पूर्णे जीवने कदाचित् एव योग्यः अनुभवी च दासः प्राप्यते। बुद्धिमतां कथनम् अस्ति यत् योग्यः अनुभवी च दासः पुत्रेभ्यः अपि गरीयान् भवति ....

? किं भवन्तः कारणं जानन्ति यत् दासः पुत्रेभ्यः अपि गरीयान् अस्ति इति चिन्तितवतां चिन्तनं किमर्थम् आसीत् ?

**आश्रितः** यः कस्यचित् अन्यस्य जनस्य संरक्षणे वसति तस्मिन् निर्भरः स्यात्।

खलजीशासकाः तुगलकशासकाः च बंदगाँ इत्येतेषां निरन्तरं नियुक्तीः कृतवन्तः युगपदेव स्वाश्रितान् निम्नवर्गजनान् अपि महत्सु राजनीतिकपदेषु आसीनान् कुर्वन्ति स्म। एतादृशानां जनानां कृते सेनापति-प्रान्ताधिपतिसदृशानि पदानि दीयन्ते स्म । परन्तु ततः राजनैतिकास्थिरता अपि जायते स्म।

दासाः आश्रिताः च स्वस्य स्वामिनः संरक्षकान् च प्रति तु निष्ठावन्तः भवन्ति स्म परन्तु तेषाम् उत्तराधिकारिणः प्रति नैव आसन्। नूतनानां शासकानां स्वकीयाः सेवकाः भवन्ति स्म। परिणामतः कस्यचित् नूतनस्य शासकस्य सिंहासनारूढे सति प्रायः नूतनानां पुरातनानां च प्रान्ताधिपतीनां मध्ये सङ्घर्षस्य प्रारम्भः जायते स्म। शासकैः निम्नवर्गस्य जनानां कृते संरक्षणदानस्य कारणात् उच्चवर्गस्य बहवः जनाः दुःखिनः भवन्ति स्म अथ च निम्नकुलसम्भवान् जनान् उच्चपदेषु उपवेशयन्ति इत्यतः तवारीखलेखकाः देहल्याः शासकानाम् आलोचनाम् अपि कृतवन्तः सन्ति ।

## मुहम्मद-तुगलक-शासकस्य अधिकारिजनाः

मुहम्मदतुगलकशासकः अजीजखुम्मार-नामकं कलालम् (मद्यविक्रेतारम्), फिरुज-हज्जाम-नामकं नापितं मनकातब्बाख-नामकं पाचकं लड्ढा एवञ्च पीरा इति नामकौ मालाकारौ उच्चप्रशासनिकपदेषु उपवेशितवान् आसीत् । चतुर्दशशताब्द्याः मध्यकालिकः इतिहासकारः जियाउद्दीनबरनी एतासां नियुक्तीनाम् उल्लेखः शासकस्य राजनीतिकविवेकस्य नाशस्य शासनस्य च अक्षमतायाः उदाहरणरूपेण अकरोत्।

? भवतां मतानुसारं बरनी शासकस्य आलोचनां किमर्थं कृतवान् आसीत् ?

पूर्वतनानां शासकानाम् इव खलजी-तुगलक-शासकैः अपि सेनानायकाः विभिन्नाम् आकारवतां क्षेत्राणां प्रान्ताधिपतिरूपेण नियोजिताः। एतानि क्षेत्राणि इक्ता इति उच्यन्ते स्म एतेषां संरक्षकाः अधिकारिणः इक्तदार इति अथवा मुक्ती इति उच्यन्ते स्म। मुक्ती इत्यस्य दायित्वम् आसीत् सैनिकाभियानानां नेतृत्वकरणम् अथ च स्वस्य इक्ता इत्यत्र अधिनियमानां व्यवस्थायाः च अनुपालनम् आसीत्। स्वस्य सैनिकसेवानां प्रतिफलं वेतनस्य रूपेण मुक्ती इति स्वसैनिकेभ्यः राजस्वस्य आदानं कुर्वन्ति स्म। राजस्वरूपेण प्राप्तराशेः एव ते स्वस्य सैनिकेभ्यः वेतनं यच्छन्ति स्म। मुक्ती इति जनेषु नियन्त्रणस्य सर्वाधिकः प्रभावशाली उपायः अयम् आसीत् यत् तेषां पदं वंशानुगतं मा भवेत् अथ च तेभ्यः कश्चित् अपि इक्ता इति स्वल्पकालाय एव लभ्येत, यदनन्तरं तेषां स्थानान्तरणं स्यात्। शासकस्य अलाउद्दीनखलजीमहोदयस्य मुहम्मदतुगलकस्य च शासनकाले वृत्तेः एतेषां कठोराणां नियमानाम् अतीव दृढतया पालनं भवति स्म। मुक्ती इति जनैः एकत्रितस्य राजस्वस्य राशेः विवरणाय राज्यद्वारा लेखाधिकारी नियोज्यन्ते स्म। एतस्मिन् विषये बहु अवधानं दीयते यत् मुक्तीजनाः राज्येण निर्धारितान् करान् एव स्वीकुर्युः अथ च निश्चितसङ्ख्यकान् सैनिकान् नियोजयेयुः।

यदा देहल्याः शासकाः नगरेभ्यः दूरम् आन्तरिकानि क्षेत्राणि अपि स्वनियन्त्रणे आनीतवन्तः तदा ते भूसामन्तान् तथा च धनाढ्यान् क्षेत्राधिपतीन् अपि स्वसत्ताधिकारे नम्रीभवितुं बाध्यान् कृतवन्तः। अलाउद्दीनखलजीमहोदयस्य शासनकाले भूराजस्वस्य निर्धारणस्य तथा च सङ्ग्रहणस्य कार्यं राज्यस्य नियन्त्रणे आसीत्। स्थानीयाः भूस्वामिनां पार्श्वे यः करादानस्य अधिकारः आसीत् सोऽपि बलात् अपहृतः अपि च ते स्वयम् अपि करं दद्युः एतदर्थं बाध्याः अपि कृताः। शासकस्य प्रशासकाः भूमेः मापनं कृतवन्तः अथ च तस्य विवरणं बहुसावधानतया सुरक्षितवन्तः। केचन पुरातनाः भूसामन्ताः क्षेत्राधिपतयः च राजस्वस्य निर्धारणाधिकारिरूपेण सङ्ग्रहणाधिकारिरूपेण च साम्राज्यस्य वृत्तिं कर्तुम् आरब्धवन्तः। तस्मिन् काले त्रिप्रकारकाः कराः आसन् (१) कृषिकरः यः खराज इति उच्यते स्म अपि च अयम् कृषकस्य उत्पादनस्य प्रायः पञ्चाशत्-प्रतिशतं भवति स्म, (२) पशुकरः, तथा च (३) गृहकरः।

इदम् अवश्यं स्मर्तव्यम् अस्ति यत् एतस्य उपमहाद्वीपस्य महत्तरः भागः देहल्याः शासकानाम् अधिकारक्षेत्रतः बहिर्भू आसीत्। देहलीतः बङ्गसदृशानां सुदूरस्थितानां प्रान्तानां नियन्त्रणम् अतीव कठिनम् आसीत् अथ च दक्षिणभारतस्य विजयस्य अनुक्षणम् एव तत् सम्पूर्णं क्षेत्रं पुनः स्वतन्त्रं जातम् आसीत्। एतावदेव न गङ्गायाः समतलेषु क्षेत्रेषु एतादृशानि सघनवनयुक्तानि क्षेत्राणि आसन् यानि प्रवेष्टुं शासकसेनाः अक्षमाः आसन्। स्थानीयाः अधिपतयः एतेषु क्षेत्रेषु

स्वाधिपत्यं स्थापितवन्तः । अलाउद्दीनखलजी मुहम्मदतुगलकः च एतानि क्षेत्राणि बलात् स्वाधीनानि कुर्वन्ति स्म, परन्तु तत् स्वाधिपत्यं कुर्वन्ति स्म, परन्तु तत् आधिपत्यं कानिचन दिनानि यावत् एव तिष्ठति स्म ।

**नायकाः तेषां दुर्गबन्धनं च**

शताब्द्याम् अफ्रीकीदेशस्य मोरक्को इत्यस्मात् भारतम् आगतः इब्नबतूता नामकः कश्चन यात्री उक्तवान् अस्ति यत् –

अधिनायकाः कदाचित् शैलयेषु पर्वतीयेषु नतोन्नतेषु च क्षेत्रेषु दुर्गस्य निर्माणं कृत्वा एवञ्च कदाचित् वंशगुल्मेषु निवसन्ति स्म । भारते वंशदण्डः अन्तर्भागात् निस्सारः न भवति । अयं दीर्घतरः भवति । एतस्य भिन्नाः भिन्नाः भागाः परस्परम् अनेन प्रकारेण ग्रथिताः भवन्ति यत् तेषु अग्नेः अपि प्रभावः न भवति अथ च ते सर्वे मिलित्वा बहुबलिनः भवन्ति । नायकाः एतेषु वनेषु निवसन्ति, यानि एतेषां कृते दुर्गप्राचीरस्य कार्यं कुर्वन्ति । एतेषां भित्तिमण्डले एव तेषां पशवः सस्यानि च भवन्ति । अन्तः एव जलस्य व्यवस्था अपि भवति, अर्थात् तत्र वृष्टेः एकत्रितं जलं भवति । अतः ते प्रबलबलशालिसेनाभिः विना पराजेतुं न शक्यन्ते । एताः सेनाः वनं प्रविश्य विशेषतया सज्जीकृद्भिः शस्त्रैः वेणुदण्डान् कर्तयन्ति ।

मङ्गोलाः १२१९ तमे वर्षे चङ्गेजखानस्य नेतृत्वे उत्तरपूर्वीरानदेशे ट्रांस-ऑक्सियाना (आधुनिकम् उजबेकिस्तानम्) इत्यस्य उपरि आक्रमणं कृतवन्तः एतदनन्तरं शीघ्रमेव देहलीसाम्राज्यं तेषां भीषणम् आक्रमणम् असहत । मङ्गोलानां देहल्याः उपरि आक्रमणानि अलाउद्दीनखलजी इत्यस्य शासनकाले एवञ्च मुहम्मदतुगलकस्य शासनकालस्य आरम्भिकेषु वर्षेषु वर्धितानि । अनेन बाध्यभूय द्वाभ्याम् अपि शासकाभ्यां काचित् विशाला सेना सज्जीकृता । एतावत्याः विशालायाः सेनायाः संवर्धनं प्रशासनस्य कृते महत् आह्वानम् आसीत् । आगच्छन्तु पश्यन्तु यत् द्वौ शासकौ एतस्य आह्वानस्य सम्मुखीकरणं कथं कृतवन्तौ ।

| अलाउद्दीन-खलजी | मुहम्मद-तुगलकः |
|---|---|
| देहल्याः उपरि १२९९ - १३०० तथा च १३०२ -१३०३ तमेषु वर्षेषु वारद्वयम् आक्रमणं जातम् । एतत् सम्मुखीकर्तुं अलाउद्दीनखलजी काञ्चित् एकां विशालां स्थायिनीं सेनां सज्जीकृतवान् आसीत् । | मुहम्मद-तुगलकस्य शासनस्य प्रारम्भिकेषु वर्षेषु साम्राज्ये आक्रमणम् अभवत् । मङ्गोलसेनायाः पराजयः अभवत् । मुहम्मदतुगलकस्य स्वसेनायाः शक्तेः स्वसंसाधनानां च उपरि एतावान् विश्वासः आसीत् यत् सः ट्रांस-आक्सियानायाः उपरि आक्रमणस्य योजनां कृतवान् । कस्याश्चित् स्थायीसेनायाः सज्जीकरणं तस्य किमपि आक्रमणकारि कार्यम् आसीत् । कृतवान् । एकस्याः स्थायीसेनायाः सज्जीकरणं तस्य आक्रमकं कार्यम् आसीत् । |

| | |
|---|---|
| अलाउद्दीनखलजी स्वस्य सैनिकानां कृते सीरीनामकम् नूतनं किञ्चन गैरिसननगरं रचितवान्। प्रथमे मानचित्रे तत् नगरम् अन्विष्यन्तु। | सः नूतनगैरिसननगरस्य निर्माणस्य स्थाने देहल्याः चतुर्षु नगरेषु देहली-ए-कुहना इति पुरातनतमं नगरम् अत्रत्यैः निवासिभ्यः रिक्तं कारयित्वा तत्र सैनिकनिवासं कृतवान् । पुरातनतमनगरस्य निवासिनः दौलताबाद इति दक्षिणे निर्मितायां नूतनराजधान्याम् अधिवासिताः। |
| सैनिकानाम् उदरपूर्तेः समस्यायाः समाधानं गङ्गा-यमुनयोः मध्यभूतायाः भूमेः राजस्वरूपेण कृषेः उत्पादनम् एकत्रीकृत्य कृतम् । कृषकाणां यत् उत्पादनम् आसीत् तस्य पञ्चाशत् प्रतिशतं भागः कररूपेण निश्चितः कृतः आसीत् । | सेनायाः उदरपूर्त्यर्थं तस्मात् क्षेत्रात् एव खाद्यान्नानि एकत्रीकृतानि । परन्तु शासकः सैनिकानां विशालसङ्ख्यायाः आवश्यकताः पूरयितुम् अतिरिक्तान् करान् अपि योजितवान् । तस्मिन् एव कालावधौ दुर्भिक्षम् अपि अभवत्। |
| निकेभ्यः वेतनम् अपि दातव्यं भवति स्म । अलाउद्दीनः सैनिकेभ्यः इक्ता इत्यस्य स्थाने साक्षात् धनम् एव वेतनरूपेण दातुं निश्चयीकृतवान् । सैनिकाः स्वस्य आवश्यकतानुगुणं देहल्याः वणिग्भ्यः वस्तूनि क्रीणन्ति स्म। एषा आशङ्का आसीत् यत् वणिजः स्ववस्तूनां मूल्यानि वर्धिष्यन्ते । अलाउद्दीनः तत् निरोद्धुं देहल्यां वस्तूनां मूल्यानि नियन्त्रितवान् । अधिकारिणः बहुसावधानतया मूल्यानां सर्वेक्षणं कुर्वन्ति स्म अथ च ये वणिजः निर्धारितमूल्येन वस्तूनि न विक्रीणन्ते स्म ते दण्डभाजाः भवन्ति स्म। | मुहम्मदतुगलकः अपि स्वसैनिकेभ्यः प्रत्यक्षधनं वेतनरूपेण यच्छन्ति स्म । परन्तु मूल्येषु नियन्त्रणस्य स्थाने सः किञ्चित् किञ्चित् वर्तमानकालस्य कर्गदेषु अङ्कितमुद्राणाम् इव “टोकन” (साङ्केतिक-मुद्रायाः) प्रचलनं कृतवान् । एतानि धातुनिर्मितानि नाणकानि न आसन् परन्तु सुवर्णस्य रजतस्य न भवन्ति स्म । एतानि अल्पमूल्यवद्धातुना निर्मितानि भवन्ति स्म । चतुर्दशशताब्द्याः जनाः एतादृशीषु मुद्रासु न विश्वसन्ति स्म । ते बहुचतुराः आसन्। ते स्वस्य स्वर्णमयानि रजतमयानि च नाणकानि सञ्चयन्ति स्म अथ च एतया साङ्केतिकया मुद्रया एव सर्वान् स्वकरान् यच्छन्ति स्म । एतस्याः अमहार्घमुद्रायाः कृत्रिमानि नाणकानि अपि सारल्येन निर्मातुं शक्यन्ते स्म। |
| प्रायः अलाउद्दीनस्य प्रशासनिकानि कार्याणि अतीव सफलानि जातानि अथ च इतिहासकारैः मूल्येषु न्यूनतार्थं विपण्यां वस्तूनां कुशलतया आपूर्त्यर्थं च तस्य शासनकालस्य बहुप्रशंसा कृता अस्ति । मङ्गोलाक्रमणानां भयस्य अपि सः सफलतापूर्वकं सम्मुखीकरणं कृतवान्। | मुहम्मदतुगलकद्वारा कृतानि प्रशासनिकानि कार्याणि अतीव असफलानि आसन् । काश्मीरे तस्य आक्रमणं सम्पूर्णतया असफलम् आसीत्। तदा सः तूरानस्य उपरि स्वाक्रमणस्य विचारं त्यक्तवान् अथ च सः स्वकीयायाः विशालसेनायाः निरस्तीकरणं कृतवान् । एतस्मिन् कालावधौ सः |

| | |
|---|---|
| | प्रशासनसम्बन्धीनि यानि कार्याणि कृतवान् आसीत् तेभ्यः अनेकाः समस्याः समुत्पन्नाः । ये जनाः दौलताबादे अधिवासिताः ते अतीव असन्तुष्टाः आसन् । करवृद्ध्या एवञ्च गङ्गा-यमुनयोः च मध्यवर्तिक्षेत्रे जातदुर्भिक्षेण विक्षुब्धा जनता विद्रोहं कर्तुम् आरब्धवती अथ च मुहम्मदतुगलकः अन्ततः साङ्केतिकां मुद्राम् अपि प्रतिस्वीकर्तुं बाध्यः जातः । |

वयम् एतासां सर्वासाम् असफलतानां गणनाकाले कदाचित् विस्मरामः यत् साम्राज्यस्य इतिहासे सर्वादौ देहल्याः केनचित् शासकेन मंगोलक्षेत्रं जेतुम् अभियानस्य योजना कृता आसीत् । एकतः अलाउद्दीनखली इत्यस्य मुख्यावधानं प्रतिरक्षा इति आसीत् अपरतः मुहम्मदतुगलकेन कृतानि कार्याणि मंगोलान् विरुद्ध्य तस्य सैनिकाक्रमणस्य योजनायाः भागभूतानि आसन् ।

## *पञ्चदश्यां शताब्द्यां तथा च षोडश्यां शताब्द्यां साम्राज्यम्*

प्रथमां तालिकां पुनः पश्यन्तु । भवन्तः द्रक्ष्यन्ति यत् तुगलकवंशस्य अनन्तरं १५२६ तमं ख्रिस्ताब्दं यावत् देहल्याः आगरायाः च उपरि सैयदवंशस्य तथा च लोदीवंशस्य शासनम् आसीत् । एतन्मध्ये एव जौनपुरे वङ्गे मालवायां गुर्जरे राजस्थाने तथा च सम्पूर्णे दक्षिणभारते स्वतन्त्राः शासकाः प्रकाशम् आगताः आसन् एतेषां राजधानयः समृद्धाः आसन् राज्यानि च संवर्धमानानि आसन् । अफगानराजपूतसदृशाः नवीनाः समूहाः शासकत्वेन अस्तित्वम् उपगताः ।

एतस्मिन् काले स्थापितेषु राज्येषु कानिचन राज्यानि लघूनि परन्तु शक्तिशालिनि आसन् अथ च तेषां शासनम् अतीव कुशलं तथा च सुव्यवस्थितरूपेण चलति स्म । शेरशाहसूरिः (१५४० -१५४५) तमे वर्षे बिहारे स्वपितृव्यस्य कस्यचित् एकस्य लघुक्षेत्रस्य प्रबन्धकरूपेण कार्यम् आरब्धवान् आसीत् कालक्रमेण च सः एतावतीम् उन्नतिम् अवाप्तवान् यत् हुमायुँ इति मुगलसम्राजम् (१५३०-१५४०, १५५५-१५५६) अपि युद्धार्थम् आहूय तं पराजितवान् । शेरशाहः देहल्याः उपरि आधिपत्यं स्थापयित्वा स्वयं स्वस्य राजवंशम् समारब्धवान् । यद्यपि सूरिवंशः केवलं पञ्चदशवर्षाणि (१५४० तः १५५५) यावत् एव शासनं कृतवान् परन्तु एतस्य प्रशासनेन अलाउद्दीनखलजी इत्यस्य अनेकाः नीतीः अनुसृत्य ताः नीतयः इतोऽपि सुदृढाः कृता । यदा महासम्राट् अकबरः (१५५६– १६०५)

मुगलसाम्राज्यस्य एकीकरणं कृतवान् तदा सः स्वादर्शरूपेण शेरशाहः इत्यस्य प्रशासनव्यवस्थाम् एव अनुसृतवान् आसीत्।

अन्यत्र

## तिस्रः श्रेण्यः, "ईश्वरीया शान्तिः" योद्धारः (नाईट) धर्मयुद्धं च

तिसृणां श्रेणीनां विचारः सर्वप्राक् एकादशशताब्द्याः आरम्भे फ्रांस-देशे सूत्रबद्धः कृतः। एतस्य अनुसारं समाजः त्रिषु वर्गेषु विभाजितः – प्रार्थनाकर्तृवर्गः, युद्धकर्तृवर्गः कृषकवर्गः च। त्रिषु वर्गेषु समाजस्य एतस्य विभाजनस्य कृते ईसायीधर्मस्य समर्थनम् अपि प्राप्तम् आसीत्। एतेन विभाजनेन ईसायीधर्मः समाजे स्वस्य प्रबलं प्रभावं इतोऽपि दृढीकर्तुं साहाय्यं लभते स्म। एतेन विभाजनेन योद्धॄणां कश्चन समूहः अपि उदयं गतः। एते योद्धारः नाइट इति उच्यन्ते स्म।

ईसायीधर्मः एकस्मै समूहाय संरक्षणं यच्छति स्म स्वस्य च "ईश्वरीय-शान्तेः" अवधारणानां प्रसारे एतेषाम् उपयोगं करोति स्म। नाइट इत्येतेभ्यः अपेक्षा क्रियते स्म यत् धर्मस्य ईश्वरस्य च सेवायां समर्पिताः योद्धारः भवेयुः। अयं प्रयासः भवति स्म यत् एते योद्धारः परस्परं युद्धतः विमुखीकृत्य तेषां मुस्लिमजनानां विरुद्धं युद्धं कर्तुं प्रेष्येरन्, यैः यरुशलमनगरस्य उपरि आधिपत्यं स्थापितम् आसीत्। एतस्य प्रयत्नस्य परिणामतः सैनिकाभियानानाम् एका शृङ्खला प्रचलिता, यः "क्रुसेड" अर्थात् धर्मयुद्धम् इति उक्तः। ईश्वरस्य धर्मस्य सेवायां कृतैः अभियानैः नाइट इत्येतेषां व्यक्तित्वं सर्वथा परिवर्तनं नीतम्। पूर्वम् एतेषां नाइट इत्येतेषां गणना कुलीनेषु न भवति स्म। परन्तु फ्रांसदेशे एकादशशताब्द्याः अन्तपर्यन्तं जर्मन्यां च ततः एकस्याः शताब्द्याः अनन्तरम् एतेषां योद्धॄणां दीनं हीनं च अतीतं सर्वथा विस्मृतवन्तः आसन्। द्वादशीं शताब्दीं यावत् तु कुलीनवर्गस्य जनाः अपि नाइट इति ख्यातिम् इच्छन्ति स्म।

### कल्पनां कुर्वन्तु



**भवन्तः अलाउद्दीनखलजी एवञ्च मुहम्मदतुगलक इत्यनयोः शासनकाले कृषकाः सन्ति भवन्तः च सम्राजा निर्धारितं करं अर्पयितुं असमर्थाः सन्ति। भवन्तः किं करिष्यन्ति ?**

### पुनः स्मरन्तु

१. कः सर्वादौ देहलीं राजधानीम् अकरोत् ?

२. देहल्याः शासकानां शासनकाले प्रशासनस्य भाषा का आसीत् ?

३. कस्य शासनस्य काले साम्राज्यस्य अधिकतरः विस्तारः अभवत् ?

४. इब्नबतूता कस्मात् देशात् भारतम् आगतवान् आसीत् ?

बीजशब्दः

इक्ता इति तारीखः,

गैरिसन इति, मंगोलः,

लिङ्गः,

खराजः

## आगच्छन्तु जानीमः

५. “न्यायचक्रस्य ‘अनुसारं सेनापतिभिः कृषकाणां हितरक्षणं किमर्थम् आवश्यकम् आसीत् ?

६. भवन्तः साम्राज्यस्य "अन्तस्सीमा" एवञ्च "बाह्यसीमा" इत्यनेन किम् अवगच्छन्ति ?

७. मुक्ती इति स्वस्य कर्तव्यानां पालनं कुर्युः, एतत् सुनिश्चेतुं के के उपायाः कृताः आसन् ? भवतां विचारानुगुणं शासकस्य आदेशानाम् उल्लङ्घनस्य ये इच्छुकाः आसन् तेषाम् एतादृश्याः मानसिकतायाः पृष्ठे कानि कारणानि भवितुं शक्नुवन्ति ?

८. देहलीसाम्राज्यस्य उपरि मंगोलानाम् आक्रमणानां कः प्रभावः जातः ?

## आगच्छन्तु विचारयामः विचारयामः

९. किं भवतां विचारानुसारं तवारीखस्य लेखकाः, सामान्यजनानां जीवनस्य विषये काम् अपि सूचनां प्रयच्छन्ति ?

१०. देहलीसाम्राज्यस्य इतिहासे रजियासम्राज्ञी स्वस्वभावस्य एका एव आसीत्। किं भवन्तः अनुभवन्ति यत् अद्यतने काले महिलानेत्र्यः सरलतया स्वीक्रियन्ते ?

११. देहल्याः शासकाः वनानि कर्तयितुं किमर्थम् आदिशन्ति स्म ? किम् आद्यापि वनानि तैः कारणैः एव कर्त्यन्ते ?

## आगच्छन्तु कृत्वा पश्येम विचारयामः

**१२.** जानन्तु यत् किं भवतां क्षेत्रे देहल्याः शासकैः निर्मापितं किञ्चित् भवनम् अस्ति ? किं भवतां क्षेत्रे इतोऽपि किमपि एतादृशं भवनम् अस्ति, यत् द्वादशशताब्द्याः आरभ्य पञ्चदशशताब्द्याः आभ्यन्तरे निर्मितं स्यात् ? एतेषु केषाञ्चित् भवनानां वर्णनं कुर्वन्ति तेषां च रेखाचित्राणि रचयन्तु।